# Ekashloki that covers all vibhaktis

# એકશ્લોકી વિભક્તિદર્શક શ્લોકાઃ

## Document Information

Text title : Ekashloki vibhaktidarshaka shlokas

File name : ekashlokivibhaktidarshaka.itx

Category : deities_misc, misc, ekashlokI

Location : doc_deities_misc

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 18, 2026

*sanskritdocuments.org*

Ekashloki that covers all vibhaktis

# એકશ્લોકી વિભક્તિદર્શક શ્લોકાઃ

## અકારાન્ત પુલ્લિઙ્ગ

રામો રાજમણિઃ સદા વિજયતે રામં રમેશં ભજે
રામેણાભિહતા નિશાચરચમૂ રામાય તસ્મૈ નમઃ ।
રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોઽસ્મ્યહં
રામે ચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધર ॥ (૩૭ રામરક્ષા)

કૃષ્ણો રક્ષતુ માં ચરાચરગુરુઃ કૃષ્ણં નમસ્યામ્યહં
કૃષ્ણેનામરશત્રવો વિનિહતાઃ કૃષ્ણાય તસ્મૈ નમઃ ।
કૃષ્ણાદેવ સમુત્થિતં જગદિદં કૃષ્ણસ્ય દાસોઽસ્મ્યહં
કૃષ્ણે ભક્તિરચઞ્ચલાઽસ્તુ ભગવન્ હે કૃષ્ણ! તુભ્યં નમઃ ॥

શ્રીરામઃ શરણં સમસ્તજગતાં રામં વિના કા ગતિઃ
રામેણ પ્રતિહન્યતે કલિમલં રામાય કાર્યં નમઃ ।
રામાત્ ત્રસ્યતિ કાલભીમભુજગો રામસ્ય સર્વં વશે
રામે ભક્તિરખણ્ડિતા ભવતુ હે રામ! ત્વમેવાશ્રયઃ ॥

દેવો જયતિ સર્વત્ર દેવં નમન્તિ સજ્જનાઃ ।
દેવેન રક્ષિતં વિશ્વં દેવાય દીયતે હવિઃ ॥

દેવાદ્ભવતિ સૃષ્ટિશ્ચ દેવસ્ય મહિમા પરા ।
દેવે તિષ્ઠતિ વિજ્ઞાનં હે દેવ રક્ષ માં સદા ॥

મિત્રં ભાતિ સદા ગેહે મિત્રં પશ્યતિ બાલકઃ ।
મિત્રેણ સહ ગચ્છામિ મિત્રાય દીયતે ધનમ્ ॥

મિત્રાત્ પ્રાપ્નોતિ સન્દેશં મિત્રસ્ય ભવનં શુભમ્ ।
મિત્રે વિશ્વાસો મે અસ્તિ હે મિત્ર ત્વં સુખી ભવ ॥

નૃપઃ પાલયતિ પૃથ્વીં નૃપં શંસન્તિ માનવાઃ ।
નૃપેણ જીયતે શત્રુઃ નૃપાય દીયતે કરઃ ॥

નૃપાત્ ત્રસ્યતિ દુષ્ટો હિ નૃપસ્ય વિપુલં બલમ્ ।
નૃપે તિષ્ઠતિ નીતિઃ ચ હે નૃપ ત્વં જયી ભવ ॥

સૂર્યઃ ભાતિ નભસ્તલે સૂર્યમ્ અર્ચતિ માનવઃ ।
સૂર્યેણ નશ્યતે ધ્વાન્તં સૂર્યાય દીયતે હવિઃ ॥

સૂર્યાત્ પ્રાપ્નોતિ લોકોઽજઃ સૂર્યસ્ય મહતી દ્યુતિઃ ।
સૂર્યે તિષ્ઠતિ તેજશ્ચ હે સૂર્ય ત્વં પ્રસીદ મે ॥

## અકારાન્ત નપુંસકલિઙ્ગ

ફલં પતતિ વૃક્ષાચ્ચ ફલં ખાદતિ બાલકઃ ।
ફલેન લભતે તૃપ્તિં ફલાય સ્પૃહયત્યયમ્ ॥

ફલાદ્ રસઃ પ્રસ્ત્રવતિ ફલસ્ય મધુરા રસાઃ ।
ફલે સન્તિ હિ બીજાનિ હે ફલ ત્વં વરં ભવ ॥

## આકારાન્ત સ્ત્રીલિઙ્ગ

લતા વર્ધતિ વાટે ચ લતાં પશ્યતિ બાલકઃ ।
લતયા ભૂષિતા શાખી લતાયૈ દીયતે જલમ્ ॥

લતાયાઃ પતતિ પુષ્પં લતાયાઃ સુન્દરં દલમ્ ।
લતાયાં કૂંજતે ભૃંગો હે લતે ત્વં પ્રફુલ્લ ભવ ॥

રમા નારાયણી દેવી રમાં પરતરાં ભજે ।
રમયા સર્વસમૃદ્ધિઃ રમાયૈ ક્રિયતે નમઃ ॥

રમાયાઃ પ્રકૃતિર્જાતા રમાયાઃ કીર્તિરદ્ભુતા ।
રમાયાં સમ્શ્રિતો લોકો હે રમે સુખદા ભવ ॥

## ઈકારાન્ત સ્ત્રીલિઙ્ગ

નદી વહતિ વેગેન નદીં પશ્યતિ બાલકઃ ।
નદ્યા ચ સિચ્યતે ક્ષેત્રં નદ્યૈ દીયતે હવિઃ ॥

નદ્યાઃ પ્રવહતિ વારિ નદ્યાઃ કૂલં મનોહરમ્ ।
નદ્યાં તરન્તિ નૌકાઃ ચ હે નદિ ત્વં પ્રસીદ મે ॥

## ઇકારાન્ત પુલ્લિઙ્ગ

હરિઃ સર્વજગદ્વન્દ્યો હરિં શ્રીરમણં ભજે ।
હરિણા પાલિતં વિશ્વં હરયે ગુરવે નમઃ ॥

હરેઃ પરતરો નાસ્તિ હરેઃ સ્તવનમુત્તમમ્ ।
હરૌ ભક્તિર્દૃઢા મેસ્તુ હે હરે મુક્તિદો ભવ ॥

## ઉકારાન્ત પુલ્લિઙ્ગ

ગુરુરેવ ગતિર્ગુરુમેવ ભજે ગુરુણૈવ સહાસ્મિ નમો ગુરવે ।
ન ગુરોઃ પરમં શિશુરસ્મિ ગુરોઃ મતિરસ્તિ ગુરૌ મમ પાહિ ગુરો ॥ શબ્દમઞ્જરિ

A compilation of shlokas that include all
declensions of a words.
Send meaningful additions to sanskrit at cheerful.com

*Ekashloki that covers all vibhaktis*

pdf was typeset on May 18, 2026

Please send corrections to *sanskrit@cheerful.com*